अग्निनारदपुराणयोः प्रथमयोः अर्थविवेचनम्

डॉ. सुजित-माइतिः *

Abstract

[पुराणेष्वपि कदाचित् व्याकरणचर्चा परिलक्ष्यते। भारतीयपरम्परायाम् अष्टादश महापुराणानि प्रसिद्धानि। तेषु अग्निनारदपुराणे विशिष्टं स्थानं विभर्तः। अत्र शोधप्रबन्धे अग्निनारदपुराणदृष्ट्या व्याकरणे अन्यतमस्य प्रतिपादितस्य विषयस्य प्रथमायाः द्वितीयायाश्च विभक्त्यर्थस्य परिशीलनं क्रियते। कारकविषयः अग्निनारदपुराणद्वये श्लोकैः प्रतिपादितः दृश्यते। ससूत्रं कारकं नात्र वर्णितम्। अत्र कारकाणां विभागा उदाहरणानि च उल्लिखितानि दृश्यन्ते। उभयत्रैव चर्चितस्य कारकतत्त्वस्य पर्यालोचनेन ज्ञायते यदत्र कारकव्यवस्था पाणिनीयवत् वर्तते। किन्तु कारकाणां भेदव्यवस्थायां क्वचित् पाणिनीयाद् वैलक्षण्यं वर्तते। पाणिनीयमतेन सह साम्यवैषाम्ययोः उल्लेखः अत्र प्रबन्धे क्रियते। एवञ्च कारकभेदकरणे तात्पर्यमपि यथामति प्रतिपाद्यते इति शम्।]

कुञ्चिकाशब्दाः— अग्निपुराणम्, नारदपुराणम्, विभक्तिः, प्रथमाविभक्तिः, द्वितीयाविभक्तिः कारकम्, कर्ता, कर्म

पुरा भवमित्यर्थे "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" [अष्टाध्यायी ४.३.२३] इति सूत्रेण ट्युप्रत्यये निपातनात् तुडभावे पुराणशब्दो निष्पद्यते। "पुराणेष्वितिहासोऽयं पठ्यते वेदवादिभिः" [मत्स्यपुराणे ५८.४] इत्यनेन यद्यपि पुराणमत्र इतिहासत्वेनापि उल्लिखितं तथापि कुत्रचिद् भिन्नार्थकरूपेणापि वर्णितम्। विल्सनमहोदयः पुराणेतिहासयोः भेदं निरूपयितुं प्रोक्तवान्—"The Itihasas are the legendary histories of heroic men before they were actually deified, whereas the Puranas are properly the history of the same heroes converted into positive gods, and made to occupy the highest position in the Hindu Pantheon"[१] इति। पुराणं भवति व्यासमुनिप्रणीतवेदार्थवर्णितपञ्चलक्षणान्वितशास्त्रम्। भगवान् व्यासदेवः पुराणानि विरचयमास इति भारतीयपरम्पराश्रुतिः। किन्तु मत्स्यपुराणमते

* सहायकाध्यापकः, नरसिंहदत्त-महाविद्यालये, हाओडायाम्, पश्चिमवङ्गेषु; Email: maitisujit93@gmail.com

[१] Hinduism, p. 82

ब्रह्मा पुराणस्य आदिप्रवक्ता । तथोल्लिखितम्—"पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्" [मत्स्यपुराणे ५३.३] इति । वायुपुराणे मत्स्यपुराणे च पुराणस्य पञ्च लक्षणानि उल्लिखातानि—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ इति ।

तथा च श्रीमद्भागवत्पुराणस्य द्वादशस्कन्दे महापुराणस्य दश लक्षणानि उक्तानि । तानि च सर्गः विसर्गः वृत्तिः रक्षा अन्तरं वंशः वंशानुचरितं संस्था हेतुः अपाश्रयश्च । अष्टादश महापुराणानि प्रसिद्धानि—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
अथान्यं नारदीयञ्च मार्कण्डेयञ्च सप्तमम् ॥
आग्नेयमष्टमं चैव भविष्यत् नवमं तथा ।
दशमं ब्रहवैवर्तं लैङ्गमेकादशं स्मृतम् ॥
वाराहं द्वादशं चैव स्कान्दं चात्र त्रयोदशम् ।
चतुर्दशं वामनं च कौर्मं पञ्चदशं स्मृतम् ।
मात्स्यं च गारुडं चैव ब्रह्माण्डञ्च ततः परम् ॥ इति ।

विविधेषु पुराणेषु व्याकरणचर्चा दरीदृश्यते । व्याकरणे प्रतिपादितेषु विषयेषु विभक्त्यर्थकथनम् अन्यतमम् । प्रबन्धेऽस्मिन् अग्निपुराणं नारदपुराणञ्चाश्रित्य प्रथमायाः द्वितीयायाश्च विभक्त्योः विचारः यथामति अल्पीयसा वचसा प्रस्तूयते ।

प्रथमायाः अर्थकथने अग्निपुराणम्

स्कन्देन अग्निपुराणे कर्तुः पञ्चप्रकारत्वं प्रदर्शितम् । तच्च शुद्धकर्ता, प्रयोजककर्ता, कर्मकर्ता, अभिहितकर्ता अनभिहितकर्ता च । एतेषु शुद्धकर्ता प्रयोजककर्ता कर्मकर्ता च प्रसिद्धा वर्तन्ते । एते त्रयः कर्तारः भूषणसारादिग्रन्थेषु प्रतिपादिता दृश्यन्ते । किन्तु पाणिनीयतन्त्रे प्रकारत्वेन अभिहितकर्ता अनभिहितकर्ता च कुत्रापि नोल्लिखितौ । अतः अधिकरूपेण एतौ द्वौ कर्तारौ अग्निपुराणे स्कन्देन षण्मुखेन वा निरूपितौ । शुद्धकर्ता अत्र स्वतन्त्रकर्तृरूपेण विवक्षितोऽस्ति । अभिहितानभिहितकर्त्रोः अभिहितकर्ता उत्तमरूपेण अनभिहितकर्ता च अधमत्वेन उल्लिखितः । तदुक्तम् अग्निपुराणे—

स्वतन्त्रः कर्ता विद्यानां कृतिनः समुपासते ।
हेतुकर्ता लम्भयते हितं वै कर्मकर्तरि ॥

स्वयं भिद्येत् प्राकृतधीः स्वयञ्च छिद्यते तरुः ।
कर्ताभिहित उत्तमः कर्तानभिहितोऽधमः ॥
कर्तानभिहितो धर्मः शिष्ये व्याख्यायते यथा ।
कर्ता पञ्चविधः प्रोक्तः..... ॥ इति ।

[अग्निपुराणम् ३५४.२,३,४]

अत्र यानि उदाहरणानि प्रदत्तानि तानि प्रबन्धेऽस्मिन् बोधसौकर्याय नालोच्यन्ते । आशुबोधाय प्रसिद्धानि कानिचिद् उदाहरणानि अस्माभिः उल्लिख्यन्ते । येन जिज्ञासवः कर्तुः भेदानां स्वरूपं सम्यग् अवगन्तुं शक्नुवन्ति ।

प्रकृतधातुवाच्यव्यापाराश्रयो भवति शुद्धकर्ता स्वतन्त्रकर्ता वा । स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वमिति कौण्डभट्टः । शुद्धकर्तुः उदाहरणम्— शिशुः क्रीडति ।

णिजर्थप्रेरणायाः यः आश्रयो भवति स हेतुकर्ता । पाणिनीयव्याकरणे हेतुकर्ता प्रयोजककर्तृत्वेन व्यवह्रियते । अतो यः प्रयोजयति स भवति प्रयोजको हेतुर्वा कर्ता । यथा—पिता देवदत्तेन पाचयति । अनेन पिता देवदत्तं पाकक्रियायां प्रयोजयतीत्यर्थो बुध्यते । अतः पिता भवति हेतुकर्ता ।

कर्मणः यदा कर्तृत्वेन विवक्षा भवति तदा सः कर्ता कर्मकर्ता इत्युच्यते । तथा सारस्वतव्याकरणे 'यत्कर्मगुणसंयोगात् कर्तृत्वेन विवक्ष्यते स कर्मकर्ता' इति । कर्मणः यदा सौकर्यातिशयादिकं द्योत्यते तदा एतादृशव्यवहारो भवति । अतः यत्र कर्तारम् उपेक्ष्य कर्मणः सुगुणैः क्रियासिद्धिः विवक्ष्यते तत्र कर्मकर्तेति व्यवहारः । यथा—ओदनः स्वयमेव पच्यते । ओदनं पचति इत्यत्र कर्मणः ओदनस्य कर्तृत्वेन विवक्षायाम् ओदनो भवति कर्मकर्ता । अनेन वाक्येन श्रीघ्रमेव विक्लित्तिः जायते इति ओदनगुणः द्योत्यते । तथा कौमारसम्प्रदायेनापि उच्यते—क्रियमाणन्तु यत् कर्म स्वयमेव प्रसिध्यति ।

सुकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद्विदुः ॥ इति

आख्यातकृत्तद्धितसमासैः उक्तः कर्ता भवति अभिहितकर्ता । अधुना क्रमेण आख्यातस्य एकं, कृतः एकं, तद्धितस्य एकं, समासस्य एकञ्च उदाहरणं दीयते । यथा—जयति हिन्दुधर्मः, कारको देवदत्तः, वैयाकरणः पुरुषः, कृतप्रणामो जनः ।

आख्यातकृत्तद्धितसमासैः अनुक्तः कर्ता भवति अनभिहितकर्ता ।

अभिहितकर्तुः यानि उदाहरणानि तान्येव वाच्यान्तरेण अनभिहितकर्तुः उदाहरणानि भवितुम् अर्हन्ति । यथा—हिन्दुधर्मेण जीयते, कृतं देवदत्तेन ।

पाणिनीयतन्त्रे यद् उक्तानुक्तशब्देन व्यवह्रियते तदेव अत्र समानार्थे अभिहितानभिहितशब्देन व्यवह्रियते । यद्यपि पाणिनिना अष्टाध्याय्याम् "अनभिहिते" [अष्टाध्यायी २.३.१] इति अधिकारसूत्रे अनुक्तार्थे अनभिहितपदं प्रयुक्तम् । किन्तु कर्तृभेदत्वेन तत्र तेन अनभिहितपदं न व्यवहृतम् । यद्यपि कर्तुः भेदा पाणिनिना साक्षात् सूत्रेण न प्रदर्शिताः तथापि पाणिनीयतन्त्रे कर्तुः भेदाः कल्प्यन्ते । अग्निपुराणे षण्मुखेन बालानां बोधसौकर्यायैव कर्तुः एते भेदा उल्लिखिताः । पञ्चविधेषु अनभिहितकर्तरि प्रथमा न प्रयुज्यते । अन्यत्र प्रथमाविभक्तेरेव प्रयोगो भवतीति स्कन्दाभिप्रायः । अनभिहितकर्तरि तृतीया भवति । प्रथमाभावादेव अत्र तस्य अधमत्वेन उल्लेख इति वक्तुं शक्यते । वस्तुतः कर्ता द्विविधः भवति स्वतन्त्रकर्ता हेतुकर्ता च । अभिहितकर्ता अनभिहितकर्ता कर्मकर्ता चैते त्रयः स्वतन्त्रकर्तुरेव प्रभेदाः । किन्तु स्कन्देन पृथक्तया सर्वेषां कर्तृत्वं प्रदर्श्य पञ्चविधत्वं प्रोक्तम् । एते विषयाः पाणिनीये "स्वतन्त्रः कर्ता" [अष्टाध्यायी १.४.५४], "तत्प्रयोजको हेतुश्च" [अष्टाध्यायी १.४.५५], "कर्तृकरणयोस्तृतीया" [अष्टाध्यायी २.३.१८] इत्यादिभिः सूत्रैः प्रतिपादिताः ।

प्रथमायाः अर्थकथने नारदपुराणम्

नारदपुराणे प्रत्येकं विभक्तीनाम् अर्थनिर्देशोऽपि श्लोकेन विधीयते । यथा प्रथमाविभक्तेः अर्थः निर्दिश्यते—

सुप्तिङन्तं पदं विप्र सुपां सप्त विभक्तयः ।
स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकात्मिका ॥

[नारदपुराणस्य पूर्वभागस्य द्वितीयपादः ५२.२]

अतः सु औ जस् इति सुपां त्रिकम् उद्दिश्य प्रथमाविभक्तिसंज्ञा विधीयते । प्रातिपदिकार्थः प्रथमाविभक्तेरर्थः । तथाहि उच्यते "सा प्रातिपदिकात्मिका" इति । प्रातिपदिकस्य स्वरूपं प्रथमाविभक्त्या अभिसूच्यते । अतः प्रातिपदिकार्थे प्रथमा भवति । अत्रापि नियतोपस्थितिकः प्रातिपदिकार्थः स्वीकर्तव्यः । अर्थात् यस्मिन् शब्दे उच्चारिते यस्यार्थस्य नियमेन भानं भवति स तस्य शब्दस्य अर्थ इत्यर्थः । प्रातिपदिकार्थविषये मतभेदो दृश्यते–

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नामार्था इति सर्वेऽमी पक्षाः शास्त्रे व्यवस्थिताः ॥

[शब्दकौस्तुभः, कारिका २५]

केषाञ्चन मते प्रवृत्तिनिमित्तं व्यक्तिर्वा इत्येकं प्रातिपदिकार्थः । अन्येषां मते प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्विकं प्रातिपदिकार्थः । इतरेषां मते प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं चेति त्रिकमेव प्रातिपदिकार्थः । अपरेषां मते प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं सङ्ख्या चेति चतुष्कं प्रातिपदिकार्थः । परेषां मते तु प्रवृत्तिनिमित्तं व्यक्तिः लिङ्गं सङ्ख्या कारकं चेति पञ्च प्रातिपदिकार्थः । नारदपुराणं प्रातिपदिकार्थप्रसङ्गे त्रिकपक्षे एव प्रमाणं कथयति । तद्विषये श्लोकोऽयमुक्तः—

सम्बोधने च लिङ्गादावुक्ते कर्मणि कर्तरि ।
अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम् ॥

[नारदपुराणस्य पूर्वभागस्य द्वितीयपादः ५२.३]

सम्बोधनेऽपि प्रथमा भवति । पुनश्च लिङ्गादौ इत्यनेन लिङ्गपरिमाणवचनेष्वपि प्रथमा प्रयुज्यते इति उच्यते । अर्थात् यत्र प्रातिपदिकार्थाद् अतिरिक्ततया लिङ्गं भासते एवं प्रातिपदिकार्थलिङ्गाभ्याम् अतिरिक्ततया यत्र परिमाणं भासते, वचनमात्रे च प्रथमा उपयुज्यते । एवञ्च उक्ते कर्मणि कर्तरि च प्रथमा भवति । वस्तुतः प्रातिपदिकादुत्तरं स्वादिप्रत्यया भवन्तीत्यर्थं प्रातिपदिकस्य ज्ञानम् आवश्यकम् । किं नाम प्रातिपदिकमिति विषये उच्यते धातुं प्रत्ययञ्च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकम् । प्रत्ययेनात्र प्रत्ययान्तमपि गृह्यते ।

द्वितीयायाः अर्थकथने अग्निपुराणम्

कर्तुः भेदान् प्रदर्श्य अग्निपुराणे कर्मणः सप्त भेदा निरूपिताः । तानि च ईप्सितकर्म, अनीप्सितकर्म, नैवेप्सितं नानीप्सितं कर्म, अकथितं कर्म, कर्तृकर्म, अभिहितकर्म अनभिहितकर्म च । तदाह—

ईप्सितं कर्म च यथा श्रद्दधाति हरिं यातिः ।
अनीप्सितं कर्म यथा अहिं लङ्घयते भृशं ॥
नैवेप्सितं नानीप्सितं दुग्धं सम्भक्षयन्नजः ।
भक्षयेदप्यकथितं गोपालो दोग्धि गां पयः ॥

कर्तृकर्माथ गमयेच्छिष्यं ग्रामं गुरुर्यथा ।
कर्म चाभिहितं पूजा क्रियते वै श्रिये हरेः ॥
कर्मानभिहितं स्तोत्रं हरेः कुर्यात्तु सर्वदम् ।... इति ।

[अग्निपुराणम् ३५४.५, ६, ७, ८]

कर्ता स्वनिष्ठक्रियया यम् अतिशयेन सम्बन्धुम् इच्छति तस्य भवति ईप्सितकर्मसंज्ञा । यथा—देवदत्तः हरिं भजति इति । अत्र कर्ता देवदत्तः स्वनिष्ठभजनक्रियया हरिम् अतिशयेन सम्बन्धुम् इच्छति इत्यतः हरिः भवति ईप्सितकर्म ।

न ईप्सितम् इति विग्रहे नञ्तत्पुरुषे अनीप्सितम् इति पदं निष्पद्यते । अत्र असुरवद् नञो विरोधोऽर्थः स्वीकर्तव्यः । अतः द्वेष्यरूपं यद् कर्म तदेव अग्निपुराणे अनीप्सितकर्म । यथा—भृशम् अहिं लङ्घयते । अत्र अहिः द्वेष्यत्वेन विवक्षितोऽस्ति । यतो हि अहिः नात्र कर्तुः इष्टः । अतः अहिः अनीप्सितकर्म ।

"नैवेप्सितं नानीप्सितम्" इत्यनेन कर्मणो एको भेदः अग्निपुराणे उपदिष्टः । वस्तुतः तद् कर्म औदासीन्यरूपं कर्म । यथा दुग्धं सम्भक्षयन् रजः भक्षयेत् इति । अत्र औदासीन्येन सम्पादितायाः भक्षणक्रियायाः फलाश्रयः रजः भवति । अतः रजो भवति नैवप्सितं नानीप्सितं कर्म ।

अपादानादिविशेषैः अविवक्षितत्वेन यत् कर्म तद् भवति अकथितं कर्म । यथा गां दोग्धि पयः इति । क्षरणानुकूलव्यापारः दुहेर्थः । अत्र पयः ईप्सितं कर्म । गौस्तु क्षरणे अपादानम् । किन्तु अत्र अपादानत्वमुपेक्ष्य सम्बन्धसामान्यत्वेन विवक्षायां गोः अकथितकर्मत्वम् ।

पूर्वं कर्ता सन् पश्चात् यः कर्म भवति तत् कर्तृकर्म । अणिजन्तदशायां गत्यद्यर्थानां धातूनां प्रयोगे यः कर्ता, सः णिजन्तावस्थायां कर्म भूत्वा कर्तृकर्म भवति । यथा—गुरुः ग्रामं शिष्यं गमयेत् इति । अणिजन्तदशायां शिष्यः ग्रामं गच्छेत् इत्यत्र शिष्यः कर्ता । तं च शिष्यं गुरुः प्रेरयेत् इति णिजन्तस्थले सः शिष्यः कर्म भवति । तेन गुरुः शिष्यं ग्रामं गमयेत् इति वाक्यप्रयोगः । अत्र शिष्यः कर्तृकर्म ।

आख्यातकृत्तद्धितसमासैः उक्तं कर्म भवति अभिहितकर्म । अभिहितकर्मणः दृष्टान्तत्वेन अग्निपुराणे पूजा क्रियते इति निर्दिष्टम् । पूजा क्रियते इति आख्यातेन कर्मणः उक्तत्वे उदाहरणम् । तथा कृता कर्मणः

उक्तत्वे भुक्तः ओदनः, तद्धितेन कर्मणः उक्तत्वे शतिकः पटः, समासेन च कर्मणः उक्तत्वे आरूढवानरः वृक्षः चेति उदाहरणं भवितुम् अर्हति ।

आख्यातकृत्तद्धितसमासैः अनुक्तं कर्म अनभिहितकर्म । यथा—हरेः स्तोत्रं कुर्यात् इति । अत्र स्तोत्रमिति कर्म आख्यातेन अनुक्तत्वे उदाहरणम् । ओदनं भुक्तवान् इति कृता अनुक्तत्वे उदाहरणम् । अनभिहितकर्तृवत् अत्रापि तद्धितसमासयोः उदाहरणानि न प्राप्यन्ते ।

एवं कर्मणः सप्तविधत्वम् अग्निपुराणे उल्लिखितम् । वस्तुतः सम्यग् विमर्शेन ज्ञायते आदौ कर्म द्विविधम् । ते अभिहितकर्म अनभिहितकर्म च । अभिहितकर्मणि प्रथमा एव भवति । पाणिनीयव्याकरणेऽपि उक्ते कर्मणि केवलं प्रातिपदिकार्थे प्रथमैव भवति । अभिहिताद् भिन्नः भवति अनभिहितः । अनभिहितकर्मणि सामान्येन द्वितीया भवेत् । ईप्सितकर्म, अनीप्सितकर्म, ईप्सितानीप्सितेतरकर्म, कर्तृकर्म चेत्येतानि चत्वारि कर्माणि अनभिहितकर्मण्येव अन्तर्यान्ति । अनभिहितकर्मणि द्वितीयाद्याः विभक्तयः यथायोग्यं भवन्ति । एते विषयाः पाणिनीये "कर्तुरीप्सिततमं कर्म" [अष्टाध्यायी १.४.४९], "तथायुक्तं चानीप्सितम्" [अष्टाध्यायी १.४.५०], "अकथितञ्च" [अष्टाध्यायी १.४.५१], "गतिबुद्धिप्रत्यवसानार्थ-शब्दकर्माकर्मकाणामणि कर्ता स णौ" [अष्टाध्यायी १.४.५२], "हृक्रोरन्यतरस्याम्" [अष्टाध्यायी १.४.५३] चेति सूत्रैः "नीवह्योर्न" इत्यादिवार्तिकैश्च प्रतिपादिता वर्तन्ते । पाणिनीयतन्त्रेऽपि कर्मणः सप्तविधत्वं दृश्यते । तत्र ईप्सिततम-अनीप्सितभेदाद् कर्म मुख्यतो द्विविधम् । ईप्सिततमं कर्म निर्वर्त्य-विकार्य-प्राप्यभेदेन त्रिविधम् । अनीप्सितं कर्म उदासीनम् द्वेष्यम् संज्ञान्तरैरनाख्यातम् अन्यपूर्वकमिति भेदाच्चतुर्विधम् उक्तम् । एवं साकल्येन कर्मणः सप्त भेदाः भर्तृहरिणा वाक्यपदीये उल्लिखिताः—

निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम् ।
तच्चेप्सिततमं कर्म चतुर्द्धान्यत्तु कल्पितम् ॥
औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥ इति ।

[वाक्यपदीयस्य साधनसमुद्देशः ४५, ४६]

द्वितीयाया अर्थकथने नारदपुराणम्

अम् औ शस् इति त्रिकस्य द्वितीयाविभक्तिः इति नाम । द्वितीया विभक्तिः

अनुक्ते कर्मणि भवति । किं नाम कर्म इत्यत्र नारदपुराणे उक्तम् यत् क्रियते तत् कर्म इति । अतः कर्त्रा यत् क्रियते तत् कर्म । एवञ्चात्र अन्तरान्तरेण चेति शब्दयोगेऽपि द्वितीयाविभक्तिः विधीयत इति प्रोक्तम् । तदुक्तम्—

अमौशसो द्वितीया स्यात् तत्कर्म क्रियते च यत् ।
द्वितीया कर्मणि प्रोक्तान्तरान्तरेण संयुते ॥

[नारदपुराणस्य पूर्वभागस्य द्वितीयपादः ५२.४]

द्वितीया अनुक्ते कर्मण्येव स्यात् । उक्ते कर्मणि तु प्रथमा भवेत् । शिवः **रामं** भजति इति अनुक्तकर्मण उदाहरणम् । रामम् इति पदस्य अनुक्तत्वात् अत्र द्वितीया भवेत् । अत्रोदाहरणे शिवेन रामः भज्यते इति रामस्य कर्मत्वम् । रामो भज्यते इत्यत्र तु उक्तत्वात् राम इति उक्ते कर्मणि प्रथमा प्रयुक्ता । अन्तरा इति शब्दयोगे द्वितीयाया उदाहरणम्—मां त्वाञ्च अन्तरा भवान् अस्ति इति । एवञ्च अन्तरेण इति शब्दस्य योगे द्वितीया यथा—हरिम् अन्तरेण सुखं नास्ति इति ।

प्रबन्धेऽस्मिन् अग्निनारदपुराणे आश्रित्य प्रथमायाः द्वितीयायाश्च विभक्तिद्वयस्य समासेन विचारः प्रतिपादितः । अग्निपुराणे उदाहरणत्वेन प्रदत्तानां विभक्त्यर्थसिद्धरूपाणां परिशीलनेन ज्ञायते यदत्र विभक्त्यर्थव्यवस्था पाणिनीयवत् वर्तते । किन्तु कारकभेदेषु क्वचित् पाणिनीयाद्वैलक्षण्यं परिलक्ष्यते । अत्र कर्तुः पञ्चविधः, कर्मणः सप्तविधः भेदः दर्शितः । पाणिनीयेन सह यत्र साम्यं यत्र च वैषाम्यं तदुभयमपि सामान्येन अत्र प्रबन्धे उल्लिखितम् । कदाचिदत्र बोधसौकर्याय अग्निपुराणे प्रदत्तम् उदाहरणं त्यक्त्वा पाणिनीयतन्त्रे प्रसिद्धम् उदाहरणं प्रदर्शितम् । किन्तु नारदपुराणे प्रतिपादितः कारकविषयः कातन्त्रव्याकरणानुयायी दृश्यते । शर्ववर्मा नारदपुराणस्य कारकतत्त्वतः अनुप्राणित आसीदिति स्पष्टं प्रतीयते । बालानां सुखबोधः यथा स्यात् तदर्थं प्रचेष्टा अस्यां ग्रन्थशैल्यां दरीदृश्यते । अत्र कारकभेदः न प्रदर्शितः बालानां अनायासबोधाय इति चिन्तयामः । एवं अत्र प्रबन्धे यथामति प्रथमाद्वितीयाविभक्तिद्वयस्य स्वरूपं सोदाहरणं निरूपितमिति शम् ।

✶✶✶

Bibliography

1. *अग्निपुराणम् ;* बादरायणः ; चौखम्बा संस्कृत प्रतिष्ठान ; वाराणसी ; २००४ ।
2. *अग्निपुराणगोष्ठीप्रबन्धाः ;* नागसम्पिगे, ए.वि कट्टि, रङ्गनाथ (सम्पादकः) ; पूर्णप्रज्ञसंशोधनमन्दिरम् ; बेङ्गलूरु ; २०१३ ।
3. *नारदपुराण ;* बादरायणः ; गीताप्रेस ; गोरखपुर ; २००४ ।
4. *नारदीयमहापुराणम् ;* महर्षिव्यासः कृष्णद्वैपायनः ; श्रीकृष्णदासः खेमराजः (प्रकाशकः) ; श्रीवेङ्कटेश्वर-स्टीम-यन्त्रालय ; मुम्बाई ; १९८० ।
5. *वाक्यपदीये साधनसमुद्देश ;* मृणालकान्तिः गङ्गोपाध्यायः ; संस्कृत बुक डिपो ; कलकाता ; २०१३ ।
6. *संस्कृत साहित्येर इतिहास ;* देवकुमारः दासः ; सदेश ; कोलकाता ; २०१२ ।
7. *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमातत्त्वबोधिनीविभूषिता, प्रथमो भागः) ; भट्टोजिदीक्षितः ; शिवप्रसाद-शर्मा (सम्पादकः) ; चौखम्बा विद्याभवन ; वाराणसी ; २००८ ।

✳ ✳ ✳